Reg. No. | | | | | | | | | |

# BBASKL 281

## Choice Based Credit System IV Semester B.B.A. Degree Examination, September 2022
## (2020 – 21 Batch Onwards)
## SANSKRIT LANGUAGE

Time : 3 Hours Max. Marks : 80

*सूचना :* 1) ***संस्कृत**भाषया, **कर्णाटक**भाषया, **आङ्ग्ल**भाषया वा उत्तराणि लिखत ।*
2) *प्रश्नसंख्या **VI, VII, VIII** एतेषाम् उत्तराणि **संस्कृत**भाषया एव लेखनीयानि ।*

I. अधोनिर्दिष्टेषु **द्वयम्** अनुवादं कृत्वा **कर्णाटक**भाषया **आंग्ल**भाषया वा विवृणुत । **(2×5=10)**

1) अस्माकं मध्ये यदा विरोधः तदा पञ्चपाण्डवानां एकः पक्षः । शतकौरवाणामपरः पक्षः । परन्तु, यदा बाह्यः कश्चित् अस्माकं विरोधं करोति तदा तु कौरवपाण्डवभेदं विस्मृत्य वयं पञ्चाधिकं शतं कुरवः एव । तादृशमैक्यम् अस्मासु भवेदिति युधिष्ठिरलोकनीतिः । छिद्रं कुत्र नास्ति ? नास्माकमन्तर्कलहः बहिर्गच्छेत् इति तदभिप्रायः । अन्यादृशस्नेहेन, यदृच्छालाभसन्तृप्त्या च सुमधुरं जीवनं तदानीं निर्वहन्ति स्म ।

2) 'यथार्थनामन् सत्यकाम, त्वं धन्यधन्योऽसि । ते मुखे दृश्यमाना प्रसन्नतैव ब्रह्मवेत्तृत्वं स्पष्टीकरोति । निर्जने तस्मिन्नरण्ये विद्यां को वा त्वाम् अबोधयत् ?' इति आनन्दाश्रूणि विससर्ज । विनीतस्तु सत्यकामः अञ्जलिं बद्ध्वा 'स्वामिन् निर्जने कान्तारे को वा विद्यां बोधयति ? प्रत्यहं कृतेन सृष्टेरीक्षणेन सम्प्राप्तमिदमल्पं ज्ञानम् । परन्तु, ज्ञानस्य पूर्णता भवादृशां गुरूणामुपदेशैरेव भवति । तस्मादुपदिशत्वाचार्यः' इति व्याजहार ।

3) 'सुखार्थाः सर्वभूतानां मताः सर्वाः प्रवृत्तयः' इत्युक्तवान् वाग्भटः । सर्वे जनाः सुखमपेक्षन्ते जगति । तदर्थं न केवलं कार्यप्रवृत्ताः भवन्ति अपि तु प्रयत्नं कुर्वन्ति । धनायत्तमपि सुखं धर्मेण विना न सिद्ध्यति । शरीरं खलु धर्मसाधनम् । अत एव उक्तं कालिदासेन 'शरीरमाद्यं खलु धर्मसाधनम्' इति । तस्य रक्षणं पोषणं तथा धर्माचरणमपि अर्थेन विना न सम्भवति । किं बहुना सकलं कार्यजातमर्थायत्तं भवति । अतः अर्थः सर्वस्य साधनं वर्तते । विवेकिना अर्थोपायाः चिन्तनीयाः कर्तव्याश्च भवन्ति ।

II. अधोनिर्दिष्टेषु **पञ्चानां** वाक्यानां विवरणं **कर्णाटक**भाषया **आंग्ल**भाषया **संस्कृत**भाषया वा लिखत । **(5×3=15)**

1) न हि राष्ट्रं नाम राज्ञः स्वम् ।

2) अर्थो हि लोके पुरुषस्य बन्धुः ।

**P.T.O.**

3) स्वामिन्, नायं सन्तापकालः ।

4) वणिजश्च नरव्याघ्र बहुमाया भवन्त्युत ।

5) मातः सस्यं नाम्यं भवति न तु तरुः ।

6) कर्तव्यः धर्मसङ्ग्रहः ।

7) सन्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ।

8) धर्मेणैव प्रजाः सर्वाः रक्षन्ति स्म परस्परम् ।

III. **द्वौ** प्रश्नौ **कर्णाटक**भाषया, **आंग्ल**भाषया **संस्कृत**भाषया वा उत्तरयत । **(2×8=16)**

1) कौटुम्बिकसमस्यानिर्वहणं महाभारते कथं चित्रितम् ?

2) अनादिकालीनं वाणिज्यशास्त्रं अधिकृय प्रबन्धं लिखत ।

3) न्यायवादी बिडालः कथासाराशं लिखत ।

4) सत्यवादित्वस्य फलं सत्यकामेन कथं सम्पादितम् ?

IV. अधोनिर्दिष्टेषु न्याय**द्वयं** **कर्णाटक**भाषया **आंग्ल**भाषया **संस्कृत**भाषया वा विशदयत । **(2×4=8)**

1) काकतालीयन्यायः ।

2) टिट्टिभन्यायः ।

3) अन्धकरदीपिकान्यायः ।

4) कूपखननन्यायः ।

V. **द्वौ** **कर्णाटक**भाषया **आंग्ल**भाषया **संस्कृत**भाषया वा टिप्पणीं रचयत । **(2×6=12)**

1) राजधर्मव्यवस्था ।

2) वनपर्वणि घोषयात्राप्रसङ्गः ।

3) कपिञ्जलः नाम चटकः ।

VI. अधोनिर्दिष्टेषु **षट्** वाक्यानि पाठ्याधारेण पूरयत । **(6×1=6)**

1) वार्तायां नित्ययुक्तः ____________ । (राजा, पत्रिका, वैश्यः)

2) ___________ हि परं मन्ये । (पौरुषं, दैवतं, प्रारब्धं)

3) कुवस्त्रता __________ विराजते । (वर्णतया, शुभ्रतया, मलिनतया)

4) नराः ____________ वशमापन्नाः । (नृपस्य, देवस्य, लोभस्य)

5) जगदिदं _________ आविर्भूतम् । (ब्रह्मणा, कर्मणा, पुण्येन)

6) तीक्ष्णदंष्ट्रः नाम अरण्य _____________ आसीत् । (व्याघ्रः, मूषकः, मार्जारः)

7) नीतिशतकं ____________ विरचितम् । (भर्तृहरिणा, कालिदासेन, जगन्नाथेन)

8) ज्ञानस्य पूर्णता ____________ उपदेशैः भवति । (जनानां, गुरूणां, ग्रन्थानां)

VII. संयोजयत । **(5×1=5)**

| | |
|---|---|
| 1) वणिक् | पञ्चतन्त्रम् |
| 2) वर्धमानकः | त्वरिता गतिः |
| 3) चित्रसेनः | वैश्यः |
| 4) धर्मस्य | छान्दोग्योपनिषत् |
| 5) सत्यकामः | गन्धर्वः |
| | बकवधः |

VIII. अधोदत्तेषु **एकं** पत्रं संस्कृतेन लिखत । **(8×1=8)**

1) सीता पुस्तकालयः, काशीनगरं, तस्मै निर्देशकाय पुस्तकार्थं संयुक्तपत्रेण सह एकं आदेशपत्रं संस्कृतेन लिखत ।

पुस्तकानि –

| | |
|---|---|
| नाट्यमौक्तिकम् | – २० पुस्तकानि । |
| पद्यमौक्तिकम् | – २० पुस्तकानि । |
| वाणिज्यमौक्तिकम् | – २० पुस्तकानि । |
| गद्यमौक्तिकम् | – २० पुस्तकानि । |

2) महाराजविद्यालयः, मैसूरुनगरं, अस्मिन् विद्यालये संस्कृताध्यापनवृत्तिं अपेक्ष्य सञ्चालकाय स्वविवरणेन सह अभ्यर्थनपत्रं संस्कृतेन लिखत ।